National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(57): 249-252
© 2024 NJHSR
www.sanskritarticle.com

**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# साक्षिस्वरूपसमीक्षणम्

**डा.नागराजभट्टः**

**शोधलेखसारः**

जीवेश्वरकोटिभिन्नः कूटस्थचैतन्यात्मा साक्षी, ईश्वरकोटिः साक्षी, जीवकोटिः साक्षी चेति वेदान्तशास्त्रे साक्षिस्वरूपं त्रेधा विभज्य निरूपितम्। अज्ञानाहङ्कारादेरवभासकत्वेन साक्षी प्रतिपन्नः। "साक्षी चेता केवलो निर्गुणश्च" इति श्रुतेः उदासीनः साक्षाद् द्रष्टा एव साक्षी इति व्याख्यातः। कूटस्थचैतन्यात्मा विशुद्धब्रह्मस्वभावो हि जीवाभेदेन साक्षी इति तत्त्वप्रदीपिकाकाराः प्राहुः। विद्यारण्यमुनयस्तु कूटस्थदीपप्रकरणे स्थूलसूक्ष्मदेहयोः अधिष्ठानभूतं कूटस्थचैतन्यमेव साक्षी इत्यूचुः। नाटकदीपप्रकरणे नृत्यशालास्थितदीपोदाहरणेन साक्षिस्वरूपं जीवेश्वरविभागानन्तर्गततया व्याख्यातम्। परमेश्वरस्य एव कश्चिद्रूपविशेषः साक्षी इति कौमुदीकारमते साक्षी ईश्वरकोटावेव निवेशितः। ईश्वरकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति मन्यन्ते तत्त्वशुद्धिकाराः। अविद्योपाधिको जीवः एव साक्षी, अन्तःकरणोपहितो जीव एव साक्षी चेति जीवकोटिपक्षोऽपि वेदान्तशास्त्रे निरूपितः। इत्थं सिद्धान्तलेशसंग्रहदिशा साक्षिस्वरूपप्रकारः शोधलेखेऽस्मिन् समीक्ष्यते।

**कूटशब्दाः – साक्षी, जीवसाक्षी, ईश्वरसाक्षी, कूटस्थः, स्वप्रकाशः, स्थूलदेहः, सूक्ष्मदेहः**

**भूमिका**

अहङ्कारप्राणदेहादीनाम् अन्तःकरणधर्माणां कामसङ्कल्पादिवृत्तीनां च अवभासकत्वेन साक्षिचैतन्यं वेदान्तशास्त्रज्ञाः प्रतिपादयन्ति। साक्षादीक्षणात् उदासीनत्वाच्च साक्षी जीवाद्भिन्न इति कथितम्। जीवस्य च कर्मतत्फलादौ अभिमानादिविकारोपपत्तेः साक्षिचैतन्याद्भेदः प्रतीयते। साक्षादेव द्रष्टा उदासीनश्च साक्षी इति सङ्ग्रहार्थः। द्रष्टृत्वं नाम दृष्टिक्रियाकर्तृत्वमेव। उदासीनत्वं नाम निर्विकारत्वम्। तच्च निर्विकारत्वं कर्तृत्वादिराहित्यमेव भवति। वस्तुतस्तु स्वप्रकाशस्वरूपे साक्षिणि दृष्टिक्रियाकर्तृत्वमपि गौणमेव। अतश्च उदासीनः (निर्विकारः) अहङ्कारादीनां साक्षादेव द्रष्टा साक्षी इति फलितम्।

**१.जीवेश्वकोटिभिन्नः कूटस्थचैतन्यात्मा साक्षीति पक्षः**

जीवेश्वकोटिभिन्नः विशुद्धब्रह्मकोटिः कूटस्थचैतन्यात्मा साक्षी इति केचन वेदान्तशास्त्रविदो मन्यन्ते। तेषां च मतं सिद्धान्तलेशसंग्रहोक्तदिशा संक्षिप्यते।

**१.१. कूटस्थदीपोक्तं मतम् –**

विद्यारण्यमुनिकृते पञ्चदश्यन्तर्गतकूटस्थदीपप्रकरणे स्थूलसूक्ष्मदेहयोः अधिष्ठानभूतं कूटस्थचैतन्यमेव साक्षीति प्रोक्तम्। कूटस्थचैतन्यावच्छेदकयोः तयोः स्थूलसूक्ष्मशरीरयोः साक्षादीक्षणात्(दर्शनात्), निर्विकारत्वाच्च तस्यैव साक्षीति संज्ञा भवति। बोद्धृत्वे सति निर्विकारत्वमेव साक्षिस्वरूपम्। तदुभयोः देहयोः अवभासकतया अन्तःकरणवृत्तयः भवन्ति चेदपि स्वप्रकाशस्वरूपेण कूटस्थचैतन्येन सामान्यरूपेण अवभासो भवति इति वक्तव्यम्। जीवचैतन्याभासविशिष्टान्तःकरणात् उत्पद्यमानाः वृत्तयः देहद्वयं प्रकाशयन्ति। किन्तु वृत्तीनामन्तरालावस्थायां देहद्वयस्य प्रकाशकत्वेन कूटस्थचैतन्यमेव अङ्गीकार्यम्।

नित्यविशुद्धकूटस्थचैतन्येन साक्षिणा एव अहङ्कारप्राणदेहादीनां तद्धर्माणां च अवभाससिद्धेः न तेषु संशयाद्यनुपपत्तिः। न हि कस्यचित् अहङ्कारादिषु संशयलेशो विद्यते। अत एव इतरविषय-कज्ञानधारायामपि "अहमेतावन्तं कालमिदं पश्यन्नेवासम्" इति अहङ्कारादिषु अनुसन्धानमुपपद्यते। अहङ्कारान्तःकरणादीनां कूटस्थसाक्षिभास्यत्वे जीवस्य कथं तद्व्यवहारो वा तत्स्मृतिर्वा भवेदिति न शङ्क्यम्। तत्र च कूटस्थचैतन्यजीवचैतन्ययोः अन्योन्याध्यासनिमित्तात् कूटस्थस्य जीवैकत्वसम्भवात् कूटस्थस्य जीवान्तरङ्गत्वेन स्मृतिव्यवहारादिः सम्भवेदिति वक्तव्यम्।

जीवचैतन्यमेव साक्षी अस्तु, किं कूटस्थचैतन्याङ्गीकारेण इति गौरवदोषो न आशङ्कनीयः। यतः लौकिकवैदिककर्मसु कर्तृत्वभोक्तृत्वबुद्ध्या प्रवृत्तस्य तस्य उदासीनद्रष्टृत्वस्वभावः नैव उपपद्यते। साक्षी च उदासीनद्रष्टृत्वस्वभावतया श्रुत्या प्रसाधितः यथा "साक्षी चेता केवलो निर्गुणश्च" इति। पुनश्च "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति"[1] इति कर्मफलभोक्तुः जीवात् उदासीनस्वभावः कूटस्थसाक्षी पृथगेव सङ्कीर्त्यते। अतो न जीवचैतन्यं साक्षी, कूटस्थचैतन्यात्मा साक्षी इत्युच्यते।

### १.२. नाटकदीपोक्तं मतम् –

अथ कूटस्थचैतन्यात्मा एव साक्षी इति नाटकदीपोक्तं मतं विचार्यते। विद्यारण्यमुनिकृते पञ्चदश्यन्तर्गतनाटकदीपप्रकरणे साक्षिस्वरूपं सविस्तरं वर्णितम्। तस्मिन् नाटकदीपप्रकरणे नृत्यशालास्थितदीपोदाहरणेन साक्षिस्वरूपं जीवेश्वरविभागा-नन्तर्गततया प्रदर्शितम्।

**नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम्।**
**दीपयेदविशेषेण तदभावेऽपि दीप्यते॥[2] इति**

नृत्यशालादीपः प्रभुं सभ्यान्, नर्तकीं च सर्वानविशेषेण प्रकाशयति। तदभावेऽपि नृत्यशालास्थितानां प्रभुनर्तकीप्रभृतीनामभावेऽपि दीपं निरन्तरायं प्रकाशत एवेति तदर्थः। चिदाभासविशिष्टः अहङ्कार-रूपी जीवः भोग्यविषयजातस्य प्राप्त्यप्राप्तिनिमित्तवशात् सुखदुःखे अनुभवति। अतः प्रकृतनाटकदीपदृष्टान्ते विषयभोगनिमित्तानुसारं जीवः नृत्याभिमानिप्रभुसम इति बोध्यम्। जीवसामीप्येऽपि हर्षविषादादेरभावात् विषयाः सभ्यपुरुषस्थानीयाः भवन्ति। यथा सभ्याः प्रभुसमीपवर्तिनः तथा शब्दादयो विषयाः जीवसामीप्यं भजन्ते। अत एव दृष्टान्ते शब्दादिविषयाणां सभ्यस्थानीयत्वं कल्प्यते। बुद्धिः नर्तकीस्थानीया कल्प्या नानाविधविकारवर्तित्वात्।

तदुक्तं-

**अहङ्कारः प्रभुः सभ्या विषया नर्तकी मतिः।**
**तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः॥**[3] इति।

एवञ्च सकलभ्रमाधिष्ठानभूतं कूटस्थचैतन्यं चिदाभासविशिष्टा-हङ्काररूपिणं जीवात्मानं, तद्विषयान् शब्दादीन्, विकाररूपां बुद्धिं च जाग्रदाद्यवस्थायामविशेषेण दीपयेत्। तदेव सुषुप्त्यादौ अन्तःकरणादीनाम् अहङ्कारादीनां वा विलयेऽपि प्रकाशमानमनु-भूयते।

"चिदाभासविशिष्टाहङ्काररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षी"[4] इत्युक्तम्। इत्थं सर्वास्ववस्थासु जीवादेरवभासकः कूटस्थचैतन्यं साक्षीति सिद्धम्।

कूटस्थदीपोक्तमेव मतं नाटकदीपेऽपि समर्थितमिति अवगम्यते। कूटस्थदीपप्रकरणे तु अन्तःकरणप्रतिबिम्बरूपो हि जीवः, अन्तःकरणप्रतिबिम्बरूपस्य जीवस्य अधिष्ठानतया तदवभासकतया वा कूटस्थचैतन्यमेव साक्षी इति प्रसाधितम्। नाटकदीपप्रकरणेऽपि चित्प्रतिबिम्बविशिष्टाहङ्काररूपस्य जीवस्य अवभासकत्वेन साक्षी निरूपितः। एतेन कूटस्थदीपप्रकरणे यः साक्षी जीवाद्विविच्य प्रदर्शितः स एव नाटकदीपप्रकरणेऽपि जीवाद् भेदेन समर्थित इति तदुभयोः प्रकरणयोः साक्षिस्वरूपप्रतिपादने वैमत्यं नास्तीति गम्यते।

अतश्च साक्षी जीवकोटौ नान्तर्भवति उदासीनस्वभावत्वात्। जीवस्तु उदासीनभावरहितःकार्यकारणसाङ्घाताभिमानी प्रतीयते। अतः जीवाद्विवेकेन एव साक्षी कूटस्थचैतन्यात्मा प्रदर्शितः। नापि साक्षी ईश्वरकोटिः उदासीनस्वभावत्वादेव। सर्वज्ञसर्वशक्तस्य परमेश्वरस्य जगज्जन्मस्थित्यादिहेतुत्वेन उदासीनस्वभावत्वं नोपपद्यते। जगतः जन्मादिकार्येषु सर्वज्ञः परमेश्वरः व्यापृतः। अतश्च साक्षी कूटस्थचैतन्यात्मा जीवेश्वरकोटिबहिर्भूतः अज्ञानादीनामव-भासकत्वेन राराजते। तदुक्तं-

**जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः॥**[5] इति।

### १.३. तत्त्वप्रदीपिकाकृन्मतम्

अन्तःकरणप्रतिबिम्बरूपाणां जीवानाम् अधिष्ठानरूपं प्रत्यग्भूतं विशुद्धं परं ब्रह्मैव जीवाभेदेन तत्तज्जीवाधिष्ठानतया तत्तज्जीव-तादात्म्यसम्भवात् साक्षी इत्युक्तं तत्त्वप्रदीपिकाकारैः चित्सुखा-चार्यैः। तदुक्तं – "सर्वप्रत्यग्भूतं विशुद्धं ब्रह्मात्र जीवाभेदेन साक्षीति प्रतिपाद्यते"[6] इति।

"साक्षी चेता केवलो निर्गुणश्च"[7] इति श्रुत्युक्तनिर्गुणत्वोक्तिः मायोपाधिके परमेश्वरे असम्भवात् तस्य मायोपाधेः परमेश्वरस्य साक्षित्वमनुपपत्तेः, विशुद्धस्यैव ब्रह्मणः जीवाभेदेन साक्षित्वा-भिधानम्। मायोपाधिकः परमेश्वरस्तु जगत्सृष्ट्यादिकार्ये व्यापृतः

सर्वज्ञत्वादिगुणकः निर्गुणत्वेन नैव प्रतिपद्यते। तदुक्तं- "न च साक्षी चेता केवलो निर्गुणश्च इति वाक्यम् ईश्वरपरत्वादात्मनः साक्षित्वे न प्रमाणमिति युक्तम्, मायाविशिष्टरूपे तस्मिन् केवलो निर्गुण इति विशेषणानुपपत्तेः"[8] इति। इत्थं विशुद्धं प्रत्यगात्मस्वरूपं ब्रह्मैव साक्षीति चित्सुखीयं मतं प्रसाधितम्।

**२. ईश्वरकोटिरेव साक्षीति पक्षः**

**२.१. कौमुदीकारमतम्**

परमेश्वरस्य एव कश्चिद्रूपविशेषः साक्षी इति कौमुदीकारमते साक्षी ईश्वरकोटिः भवति।

**"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।**
**कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च"**[9] इति।

श्वेताश्वतरश्रुत्युक्ताः देवत्वसर्वभूताधिवासत्वादिधर्माः परमेश्वरस्यैव मुख्यतया सम्भवन्ति। हिरण्यगर्भादिषु ते धर्माः गौणाः। देवत्वादिधर्मश्रुतेः जीवगतप्रवृत्तिनिवृत्त्योः द्रष्टा स्वयमुदासीनः परमेश्वरस्यैव कश्चिद् रूपभेदः साक्षी इति कथ्यते। सुषुप्त्यादौ अज्ञानान्तःकरणावभासकत्वेन साक्षी जीवस्यापरोक्षः प्रतीयते किन्तु तस्य परमेश्वररूपभेदस्वीकारे परोक्षत्वापत्तेरिति। यतः परमेश्वरस्य धर्माः सर्वज्ञत्वकारणत्वादयो धर्माः जीवं प्रति प्रत्यक्षायोग्याः। एवञ्च साक्षिणः परमेश्वररूपभेदकल्पनायां जीवं प्रति तस्य परोक्षत्वापत्तिरिति न वाच्यम्। "अनश्नन्नन्योऽभिचाकशीति" इति मन्त्रः परमेश्वररूपभेदस्य साक्षिणः उदासीनस्वभावे प्रमाणत्वात्, कारणत्वसर्वज्ञत्वादिधर्मास्पदे च परमेश्वरे सृष्टिवाक्यानां प्रमाणत्वात्, परमेश्वरस्यैव रूपविशेषः साक्षी सर्वज्ञत्वकारणत्वादिधर्माविषयत्वात् जीवोपाधेः अज्ञानान्तःकरणादेरवभासकत्वाच्च जीवस्यापरोक्षः अन्तरङ्गश्च भवतीति फलितार्थः। साक्षी अन्तःकरणतद्धर्माणां कामसङ्कल्पादीनाम् अवभासकत्वेन अङ्गीकृतः। अत एव "अहमज्ञः अहं सुखी, अहं दुःखी" इत्यादेः व्यवहारस्य सम्पादकः साक्षी अनुमतः। सुषुप्तवस्थायां कार्यकरणयोरुपरमेऽपि जीवोपाधेरज्ञानस्य अवभासकतया परमेश्वरस्यैव रूपविशेषः साक्षी प्राज्ञशब्देन निरुक्तः। यथोक्तं "तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"[10] इति।

एवमेव उत्क्रान्तिविषयकवाक्यमपि परमेश्वरस्य एव कश्चिद्रूपविशेषः प्राज्ञः साक्षी इत्यत्र प्रमाणम्। तद्यथोक्तं "प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति"[11] इति। इत्थं सुषुप्तिविषयकश्रुतौ उत्क्रान्तिविषयकश्रुतौ च प्राज्ञशब्देन जीवातिरिक्तः परमेश्वररूपविशेषः साक्षी इत्यवगम्यते। पूर्वोदाहृतश्रुतिवाक्याभ्यां सुषुप्तौ उत्क्रान्त्यवस्थायां च जीवाद् भेदेन प्राज्ञशब्दितः परमेश्वरः प्रतिपादित इति सुषुप्त्युत्क्रान्त्यधिकरणस्य[12] निर्णयोऽपि साक्षिस्वरूपं निर्वक्ति। अतश्च कौमुदीमतं संग्रहेण प्रोक्तं यथा-

**ईशस्य रूपभेदोऽसौ कारणत्वादिवर्जितः।**
**जीवान्तरङ्गः कौमुद्यां प्राज्ञाख्यः परिकीर्तितः॥**[13] **इति।**

अतश्च परमेश्वरस्यैव कश्चिद्रूपभेदः उदासीनः द्रष्टा साक्षी परमेश्वरकोटिरेव इति सिद्धम्।

**२.२. तत्त्वशुद्धिकारमतम्**

"इदं रजतम्" इत्यत्र भ्रमस्थाने रजताभेदेन प्रतीयमानोऽपि इदमंशः भ्रमपदार्थे रजते नान्तर्भवति। यतः नेदं रजतमिति स्वोत्तरवृत्त्या बाध्यमानः रजतपदार्थो भवति किन्तु इदमंशः अबाध्यमानतया अनुवर्तमानः प्रतीयते। नापि रजताभेदेन प्रतीयमानस्य इदमंशस्य शुक्तावेव अन्तर्भावः, शुक्त्यंशः इव अज्ञातत्वापत्तेः। अतश्च इदमंशस्य वस्तुतः शुक्तिकोट्यन्तर्गतत्वेऽपि प्रतिभासतस्तस्य रजतकोटिप्रवेशः अङ्गीक्रियते। एवमेव ईश्वरकोटिरेव साक्षी प्रतिभासतो जीवकोटिरिति मन्यन्ते तत्त्वशुद्धिकाराः[14]। साक्षिणः ईश्वरकोटित्वेऽपि तत्तज्जीवाभिन्नत्वम् एव। "अहं सुखमनुभवामि" इत्यादिव्यवहारे साक्षिप्रतिभासोपलब्धेः। चिदाभासात्मकतत्तज्जीवाधिष्ठानरूपस्य साक्षिणः सुखादिव्यवहारे तत्तज्जीवाभिन्नत्वमिति तत्त्वशुद्धिकारैः कौमुदीकारमतमेव समर्थितम्। तदुक्तं "साक्षिणो वस्तुतोऽपि जीवान्तर्भावे तस्य ब्रह्मकोटित्वोक्तिविरोधात् तस्य ईश्वररूपभेदत्वं तत्त्वशुद्धिकाराभिमतमिति गम्यत इति भावः"[15]। इत्थम् ईश्वरकोटिरेव साक्षी सुखादिव्यवहारे तत्तज्जीवाभेदेन जीवकोटिरिति फलितम्।

**३.जीवकोटिरेव साक्षीति पक्षः**

जीवसाक्षिणोरभेदपक्षः संक्षेपेण निरूप्यते।

**३.१."अविद्योपाधिको जीव एव साक्षाद् द्रष्टृत्वात्साक्षी"**[16] इत्युक्तम्। उदासीनत्वे सति द्रष्टृत्वमेव साक्षित्वम् इति पूर्वोक्तम्। असङ्गोदासीनस्वभावस्य अविद्याप्रतिबिम्बरूपस्य जीवस्यैव साक्षित्वोपपत्तौ तदतिरिक्तः कूटस्थसाक्षी परमेश्वरकोटिकः साक्षी वा न कल्पनीयः गौरवदोषात्। न लौकिकवैदिककर्मकर्तुः जीवस्य औदासीन्यमेव असिद्धमिति वाच्यम्। यतः जीवगतः कर्तृत्वाभिमानः बुद्धितादात्म्यनिबन्धन इति तद्दोषः परिह्रियते। न च साक्षी जीवकोटिः "एको देवः सर्वभूतेषु गूढः" इति श्रुतिविरोधादिति वाच्यम्। "एको देवः" इति च जीवभावाभेदेन ब्रह्मस्वरूपनिरूपणपरः मन्त्रगतः साक्षित्वनिरूपणभाग इति वेद्यम्। "द्वा सुपर्णा" इति मन्त्रस्तु गुहाधिकरणदिशा (ब्रह्म.सू.१.२.३) जीवेशोभयपरः इति हेतोः न विवादः। अतश्च अविद्योपाधिको जीवः साक्षीति सिद्धम्।

**३.२. अन्तःकरणोपहितो जीवः एव साक्षी** इत्यन्येषां मतम्। अस्मिन्नपि मते अविद्यायां चित्प्रतिबिम्बरूपस्य जीवस्य साक्षित्वं प्रसाध्य कश्चिद्विशेषः उपपाद्यते। सर्वगताविद्योपाधिकत्वेन रूपेण साक्षी ईश्वरकोटिः इति मते पुरुषविशेषस्य पुरुषान्तरीयान्तःकरणप्रत्यक्षता स्यात्। यतः पुरुषान्तरान्तःकरणावभासकेन साक्षिणा पुरुषविशेषस्य सामान्यसंसर्गोपपत्तेः। यथा देवदत्तान्तः करणावभासकः साक्षी यज्ञदत्तान्तःकरणेनापि सम्बद्धमिति हेतोः यज्ञदत्तान्तःकरणं तद्धर्माणां च साक्षिप्रत्यक्षत्वापत्तिः। अतः सर्वगताविद्यायां प्रतिबिम्बितः चिद्रूपः परमेश्वर एव साक्षी इति न स्वीक्रियते। अतः अन्तःकरणोपहितः जीव एव साक्षी इत्यभ्युपगमः। प्रतिपुरुषम् अन्तःकरणभेदात्, प्रतिपुरुषं साक्षिभेदोपपत्तेः पुरुषविशेषस्य पुरुषान्तरान्तःकरणासंसर्गात् तत्प्रत्यक्षता न सम्भवति। न च सुषुप्तौ कार्यकारणयोः विलयप्रसङ्गात् अहङ्कारस्य साक्षिवेद्यत्वं न भवेदिति वाच्यम्। सुषुप्तावपि अन्तःकरणस्य सूक्ष्मभावेन सद्भावाङ्गीकारात् तदुपहितः साक्षी वर्तत एव इति नैव दोषः सम्भवति। साक्षिणा एव सुषुप्तौ अज्ञानावभासः। सुषुप्तौ प्रमातुरभावेऽपि साक्षी निरन्तरम् अवभासते एव। अन्तःकरणविशिष्टः प्रमाता, अन्तःकरणोपहितः साक्षीति तदुभयोः भेदः स्वीक्रियते।

**उपसंहारः**

"साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रुतिबलात् वेदान्तशास्त्रे उदासीनः द्रष्टा एव साक्षी इति उच्यते। साक्षिणः स्वरूपप्रकारस्तु संक्षेपेण पुर्वोक्तदिशा त्रेधा विभज्य प्रदर्शितः। जीवेश्वरोभयकोटिबहिर्भूतः कूटस्थचेतनो हि साक्षी इति विद्यारण्यप्रभृतयः मन्यन्ते। कूटस्थस्यैव उदासीनत्वं द्रष्टृत्वं च मुख्यतया सम्भवात्। तत्त्वप्रदीपिकाकारास्तु सर्वप्रत्यग्भूतं विशुद्धं ब्रह्मैव जीवाभेदेन साक्षीति प्रतिपादयन्ति। भगवद्गीतायामपि अनेकत्र कूटस्थशब्देन साक्षी निरूपितः। कूटे मायायां तदध्यक्षरूपेण अविकारितया स्थितः कूटस्थ इति व्याख्यातः[16]। अतश्च अन्तःकरणतद्धर्मादीनाम् अहङ्कारस्य चावभासकत्वेन साक्षी प्रत्येतव्य इति शिम्।

**परिशीलितग्रन्थसूची**

**१.सिद्धान्तलेशसंग्रहः** (प्रथमो भागः) - संपादकः-प्रो.पारसनाथ-द्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, २००५

**२.तत्त्वप्रदीपिका -** संपादकः- स्वामी योगीन्द्रानन्दः, चौखम्बा विद्याभवन वाराणसी, १९८५

**३.पञ्चदशी –** संपादकः आचार्यः करुणापतित्रिपाठी, उत्तर प्रदेश संस्कृत संस्थान लखनऊ, १९९७

४. https://advaitasharada.sringeri.net/

**पाद टिप्पणी**

[1] मुण्डक.उ.३.१.१
[2] पञ्चदशी- १०.११
[3] पञ्चदशी- १०.१४
[4] सिद्धान्तलेशसंग्रहः-पृ.सं.३३२
[5] पञ्चदशी- ८.५९
[6] तत्त्वप्रदीपिका-पृ.सं.५८९
[7] श्वे.उ.६.११
[8] तत्त्वप्रदीपिका-पृ.सं.५८९
[9] श्वे.उ.६.११
[10] बृ.उ.४.३.२१
[11] बृ.उ.४.३.३७
[12] ब्र.सू.१.३.१४.४२
[13] वेदान्तसिद्धान्तसूक्तिमञ्जरी -९४
[14] सिद्धान्तलेशसंग्रहः - पृ.सं.३४०
[15] कृष्णालङ्कारव्याख्या-पृ.सं.३४०
[16] सिद्धान्तलेशसंग्रहः - पृ.सं. ३४१
[17] भगवद्गीताभाष्यम्- १२.०३